श्री महाकाळी स्तोत्रं (परशुराम कृतं)

श्री महाकाळी स्तोत्रं (परशुराम कृतं)

परशुराम उवाच |
नमः शंकरकांतायै सारायै ते नमो नमः |
नमो दुर्गतिनाशिन्यै मायायै ते नमो नमः || 1 ||

नमो नमो जगद्धात्र्यै जगत्कर्त्र्यै नमो नमः |
नमोऽस्तु ते जगन्मात्रे कारणायै नमो नमः || 2 ||

प्रसीद जगतां मातः सृष्टिसंहारकारिणि |
त्वत्पादौ शरणं यामि प्रतिज्ञां सार्थिकां कुरु || 3 ||

त्वयि मे विमुखायां च को मां रक्षितुमीश्वरः |
त्वं प्रसन्ना भव शुभे मां भक्तं भक्तवत्सले || 4 ||

युष्माभिः शिवलोके च मह्यं दत्तो वरः पुरा |
तं वरं सफलं कर्तुं त्वमर्हसि वरानने || 5 ||

रेणुकेयस्तवं श्रुत्वा प्रसन्नाऽभवदंबिका |
मा भैरित्येवमुक्त्वा तु तत्रैवांतरधीयत || 6 ||

एतद् भृगुकृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् |
महाभयात्समुत्तीर्णः स भवेदेव लीलया || 7 ||

स पूजितश्च त्रैलोक्ये तत्रैव विजयी भवेत् |
ज्ञानिश्रेष्ठो भवेच्चैव वैरिपक्षविमर्दकः || 8 ||

इति श्रीब्रह्मवैवर्तपुराणे गणेशखंडे षट्त्रिंशोऽध्याये श्रीपरशुरामकृत महामाया स्तोत्रं |